# अथ श्रीकृष्णाष्टकम् ।

श्रीकृष्णाय नमः ।

श्रीगोपगोकुलविवर्धन नंदसूनो ।
राधापते व्रजजनार्तिहरावतार ॥
मित्रात्मजातटविहारण दीनबंधो ।
दामोदराच्युत विभो मम देहि दास्यम् ॥१॥
श्रीराधिकारमण माधव गोकुलेंद्र ।
सूनो यदूत्तमरमार्चितपादपद्म ॥
श्रीश्रीनिवास पुरुषोत्तम विश्वमूर्ते ।
गोविंद यादवपते मम देहि दास्यम् ॥२॥
गोवर्धनोद्धरण गोकुलवल्लभाद्य-
वंशोद्भटालयहरेऽखिललोकनाथ ॥
श्रीवासुदेव मधुसूदन विश्वनाथ विश्वेश,
गोकुलपते मम देहि दास्यम् ॥३॥
रासोत्सवप्रिय बलानुज सत्त्वराशे ।
भक्तानुकंपित भवार्तिहराधिनाम ॥
विज्ञानधाम गुणधाम किशोरमूर्ते सर्वेश,
मंगलतनो मम देहि दास्यम् ॥४॥
सद्धर्मपाल गरुडासन यादवेंद्र ।
ब्रह्मण्यदेव यदुनंदनभक्तिदान ॥

संकर्षण प्रियकृपाऽऽलय देव विष्णो,
सत्यप्रतिज्ञ भगवन् मम देहि दास्यम् ॥५॥
गोपीजनप्रियतमक्रिययैकलभ्य,
　　राधावरप्रिय वरेण्य शरण्यनाथ ।
आश्चर्यबाल वरदेश्वर पूर्णकाम-
विद्वत्समाश्रय विभो मम देहि दास्यम् ॥६॥
कंदर्पकोटिमदहारण तीर्थकीर्ते,
　　विश्वैकवंद्य करुणार्णव तीर्थपाद ।
सर्वज्ञ सर्ववरदाश्रय कल्पवृक्ष,
नारायणाखिलगुरो मम देहि दास्यम् ॥७॥
वृंदावनेश्वर मुकुंद मनोज्ञवेष
　　वंशीविभूषितकरांबुज पद्मनेत्र ।
विश्वेश केशव व्रजोत्सव भक्तिवश्य ।
देवेश पांडवपते मम देहि दास्यम् ॥ ८ ॥
श्रीकृष्णस्तवरत्नमष्टकमिदं, सर्वार्थदं वर्ण्यतां ।
भक्तानां च हितं हरेश्च नितरां यो वै पठेत्पावनम् ॥
तस्यासौ व्रजराजसूनुरतुलां, भक्तिं स्वपादांबुजे ।
सत्सेव्ये प्रददाति गोकुलपतिः, श्रीराधिकावल्लभः ।९।

इति श्रीमद्वल्लभाचार्यविरचितं श्रीकृष्णाष्टकं समाप्तम् ।

---

१ सदोत्सव